# CBSE EXAMINATION PAPER—2019 (DELHI)

## संस्कृतम्

*निर्धारित समय : 3 घण्टे* | *अधिकतम अंक : 80*

***सामान्य निर्देश:***

(*i*) *अस्मिन् प्रश्नपत्रे **चत्वारः** खण्डाः सन्ति।*
*इस प्रश्न-पत्र में **चार** खण्ड हैं।*

(*ii*) *प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् **स्थाने क्रमेण** लेखनीयानि।*
*प्रत्येक खण्ड के उत्तर एक ही जगह पर क्रम से लिखने होंगे।*

(*iii*) *प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*
*प्रश्न-पत्र के अनुसार प्रश्न-संख्या अवश्य ही लिखनी होगी।*

(*iv*) *सर्वेषां प्रश्नानाम् उत्तराणि **संस्कृतेन** लेखनीयानि।*
*सभी प्रश्नों के उत्तर **संस्कृत** में लिखिए।*

### खण्ड (क)

### अपठितांश-अवबोधनम् — 10 अङ्काः

**1.** अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तश्नानाम् उत्तराणि संस्कृतेन लिखत।

भारतवर्षे 'ग्रीष्म-वर्षा-शरद्-हेमन्त-शिशिर-वसन्त' इति षड् ऋतवः भवन्ति। तेषु 'वसन्तः' ऋतुराजः कथ्यते। वसन्तः ऋतुः फाल्गुने चैत्रमासे च भवति। तदां शैत्यं न्यूनं भवति। वसन्ते द्वौ प्रमुखौ उत्सवौ स्तः- वसन्तोत्सवः होलिकोत्सवश्च। वसन्ते सर्वत्र प्रमोदः भवति। सर्वत्र प्रकृतः विविधवर्णैः कुसुमैः हरितपल्लवैश्च सुसज्जिता दृश्यते। आम्रवृक्षे कोकिलस्य मधुरध्वनिः सर्वान् जनान् आकर्षति। सर्वत्र रम्यं वातावरणं भवति। नराः, नार्यः, युवानः, वृद्धाः च समुदं गायन्ति नृत्यन्ति च। धन्यः एषः ऋतुः यः प्रकृतेः अलौकिकीम् अद्भुतां रमणीयां रचनां च प्रदर्शयति। वयं प्रकृतिं नमामः।

(अ) एकपदेन उत्तरत। (केवलं प्रश्नचतुष्टयम्) **½ × 4 = 2**

(*i*) ऋतुराजः कः कथ्यते?
(*ii*) भारतवर्षे कति ऋतवः भवन्ति?
(*iii*) वसन्ते शैत्यं कियत् भवति?
(*iv*) वसन्ते सर्वत्र कः भवति?
(*v*) आम्रवृक्षे कस्य मधुरध्वनिः सर्वान् जनान् आकर्षति?

(ब) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्) **1 × 2 = 2**

(*i*) वसन्ते कौ प्रमुखौ उत्सवौ भवतः?
(*ii*) वसन्ते सर्वत्रप्रकृतिः कीदृशी दृश्यते?
(*iii*) वसन्तः ऋतुः कदा भवति?

(स) यथानिर्देशम् उत्तरत। (केवलं प्रश्नचतुष्टयम्) **1 × 4 = 4**

(*i*) 'नमामः' इति क्रियापदस्य कर्तृपदं किम्?

(क) नराः (ख) नार्यः (ग) वयम्

(*ii*) अनुच्छेदे 'पुष्पैः' इत्यस्य समानार्थकं पदं किं प्रयुक्तम्?

(क) विविधवर्णैः (ख) कुसुमैः (ग) पल्लवैः

(*iii*) 'अधिकम्' इति पदस्य विलोमपदं किं प्रयुक्तम्?

(क) न्यूनम् (ख) शैत्यम् (ग) रम्यम्

(*iv*) सर्वत्र रम्यं वातावरणं भवति। अत्र विशेषणपदं किं प्रयुक्तम्?

(क) सर्वत्र (ख) रम्यम् (ग) वातावरणम्

(*v*) 'धन्यः एषः ऋतुः' अत्र 'एषः' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(क) उत्सवाय (ख) प्रकृत्यै (ग) वसन्ताय

(द) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत्। **2**

## खण्ड ( ख )

## रचनात्मककार्यम् 15 अङ्काः

**2.** सञ्जयः छात्रः अस्ति। तेन पितरं प्रति अधोलिखितं पत्रं मञ्जूषा-प्रदत्तपदैः पूरयित्वा तत्पत्रं पुनः लिखत।

**½ × 10 = 5**

विवेकानन्द-छात्रवासः,

अहमदाबादनगरतः

दिनांङ्कः __________

पूज्याः (*i*) __________

सादरं प्रणामाः।

अत्र (*ii*) __________ तत्रास्तु। इदं विज्ञाय भवान् (*iii*) __________ भविष्यति यद् अस्मिन् वर्षे अहं दशमकक्षायां नवतिः प्रतिशतम् इति उत्तमांङ्कैः (*iv*) __________ जातः। एस्मिन् अवसरे आगामि-मंगलवासरे विद्यालयपक्षतः (*v*) __________ आयोजयिष्यते। अतः अहं (*vi*) __________ सादरं सूचयामि यद् भवान् मात्रा (*vii*) __________ अवश्यम् आगच्छतु। मम (*viii*) __________ भविष्यति। मातृचरणयोः मम (*ix*) __________ निवेदनीया।

विवेका

भवतः (*x*) __________

सञ्जयः

**मञ्जूषा**

| |
|---|
| स्नेहपात्रम्, उत्साहवर्धनम् अतिप्रसन्नः, कुशलं, उत्तीर्णः, भवन्तम्, पितृमहोदयाः, सह, प्रणामाञ्जलिः सम्मानसमारोहः। |

**3.** अधः प्रदतं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां साहाय्येन पञ्च वाक्यानि संस्कृतेन लिखत। **2 × 5 = 10**



**मञ्जूषा**

| |
|---|
| मिलित्वा, उत्साहपूर्वकम्, शिशवः, उद्यानम्, बालकाः, बालिकाः अध्यापकः, अध्यापिका, वृक्षाः, विकसन्ति, पुष्पाणि, बहवः, धारायन्त्रम्। |

**अथवा**

मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत।

मञ्जूषा में दिए गए शब्दों की सहायता से निम्नलिखित विषय पर पाँच संस्कृत वाक्यों में एक अनुच्छेद लिखिए।

**सत्संङ्गतिः**

**मञ्जूषा**

| |
|---|
| सज्जनानां, कथ्यते, सज्जनैः, साधुः, दुर्जनः, भवति, मनुष्योपरि, संङ्गतेः, समुन्नतिम्, सह, उपविशन्ति, प्रभावः, खादन्ति, धारयन्ति, स्वभावं, यादृशैः, भवति, तादृशः, एव। |

## खण्ड ( ग )

### अनुप्रयुक्तव्याकरणम् 25 अङ्काः

**4.** अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा लिखत। (केवलं प्रश्नचतुष्टयम्) **1 × 4 = 4**

(*i*) कार्यक्रमे भवतां **सु+आगतम्** अस्ति।

(*ii*) पूर्वस्यां दिशायां **भानुरुदेति।**

(*iii*) **वृक्ष+छाया** शोभते।

(*iv*) **महा+ऋषिः** वाल्मीकिः रामायणं रचितवान्।

(*v*) अस्माभिः जीवने **सदाचारः** पालनीयः।

**5.** अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्) **1 × 4 = 4**

(*i*) **लम्बम्** उद्रम् यस्य सः __________ इति कथ्यते।

(क) लम्बोदरम् (ख) लम्बोदरः (ग) लम्बोदरस्य

(*ii*) **शिशिरवसन्तौ** पुनरायातः।

(क) शिशिरः च वसन्तः च (ख) शिशिरम् च वसन्तम् च (ग) शिशिरः वसन्तौ

(*iii*) **विद्याहीनः** नरः न शोभते।

(क) विद्यया हीनाः (ख) विद्याः हीनाः (ग) विद्यया हीनः

(*iv*) कार्यं **निर्विध्नं** सम्पन्नम्।

(क) विध्नः अभावः (ख) विध्नानाम् अभावः (ग) विध्नेन अभावः

(*v*) सरोवरे **स्वच्छजलम्** अस्ति।

(क) स्वच्छः जलम् (ख) स्वच्छं जलम् (ग) स्वच्छस्य जलम्

**6.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा उचितम् उतरं विकल्पेभ्यः चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्) **1 × 4 = 4**

(*i*) गणेशः **गुणवान्** आसीत्।

(क) गुण+मतुप् (ख) गुणं+मतुप् (ग) गुण+क्तवतु

(*ii*) **इदं** वायुयानं गम्+शतृ अस्ति।

(क) गच्छतां (ख) गच्छत् (ग) गमत्

(*iii*) सज्जनैः भगवद्गीता **पठितव्या।**

(क) पठ्+तव्यत् (ख) पठ्+तुमुन् (ग) पठ्+अनीयर्

(*iv*) 'स्वतंत्रता' अस्माकं **मूल+ठक्** _________ अधिकारः अस्ति्।

(क) मूलकः (ख) मौलिकः (ग) मूलिकः

(*v*) **बालिका** विद्यालयं गच्छति।

(क) बालिकः+ङीप् (ख) बालक+टाप् (ग) बालक+डाप्

**7.** अधोलिखितं संवादं मञ्जूषायां प्रदतैः पदैः वाच्यपरिवर्तनं कृत्वा पुनः लिखत। **1 × 3 = 3**

शिक्षकः – किं त्वं संस्कृतम् जानासि?

छात्रः – आम् मया (*i*) _________ ज्ञायते।

शिक्षकः – किं भवान् महाभारतम् पठति?

छात्रः – आम्, (*ii*) _________ महाभारतं पठ्यते।

शिक्षकः – किं तव भगिनी आयुर्वेदं पठति।

छात्रः – आम्, तया आयुर्वेदः (*iii*) _________ ।

**मञ्जूषा**

| पठ्यते, संस्कृतम्, मया |
|---|

**अथवा**

अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कुरुत।

(क) त्वम् विद्यालयं गच्छसि।

(ख) छात्राः चित्राणि पश्यन्ति।

(ग) पाचकेन भोजनं पच्यते।

**8.** अधोलिखित-दिनचर्यायां रिक्तस्थानानि संस्कृतकालबोधकशब्दैः पूरयत। (केवलं प्रश्नचतुष्टयम्) **½ × 4 = 2**

(*i*) अहं सायंकाले 4.30 वादने __________ क्रीडामि।

(*ii*) 5.00 वादने __________ क्रीडाङ्गणात् गृहम् आगच्छामि।

(*iii*) 7.15 वादने __________ भोजनम् करोमि।

(*iv*) 9.45 वादनं __________ पर्यन्तम् अध्ययनं करोमि।

(*v*) 10.00 वादने __________ शयनं करोमि।

**9.** अधोलिखितवाक्येषु रिक्तस्थानानि मञ्जूषाप्रदतैः उचितैः अव्ययपदैः पूरयत। (केवलं प्रश्नचतुष्टयम्) **1 × 4 = 4**

(क) _________ मेघाः वर्षयन्ति।

(ख) वृद्धः मार्गे _________ गच्छति।

(ग) _________ राजा तथा प्रजा।

(घ) _________ अशोकः नृपः अभवत्।

(ङ) _________ नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।

**मञ्जूषा**

| यथा, सम्प्रति, यत्र, शनैः, पुरा |
|---|

**10.** अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। अशुद्धं पदं संशोध्य पुनः लिखत। (केवलं प्रश्नचतुष्टयम्)

**1 × 4 = 4**

(क) **आवां** संस्कृतम् पठामि।

(ख) जलम् **निर्मलः** अस्ति।

(ग) शिक्षकः छात्रान् पाठं **पाठयन्ति।**

(घ) वयम् पुष्पोत्सवं पश्यन्ति।

(ङ) ऊषा श्वः पत्रम् **अलिखत्।**

## खण्ड ( घ )

## पठित-अवबोधनम् 30 अङ्काः

**11.** अधोलिखितं गद्यांश पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत् **6**

अथ व्रजन्तौ तौ गर्तसंकले मार्गे क्रीडतः कांश्चित् बालकान् प्रेक्ष्य अवदताम्– भो भो बालकाः। कथमत्र नतोन्नते विषमे मार्गे क्रीडथ? यदि कश्चिद् गर्ते पतेत् तर्हि स विकलाङ्गो भूत्वा चिरं क्लेशम् अनुभवेत्? तच्छ्रुत्वा तेषु कश्चित् उद्दण्डः बालकः उवाच– "अयि भो! यद्येवं तर्हि कथं भवन्तौ सुपथं परित्यज्य अनेन कुपथेन गन्तुं प्रवृतौ? अपि इदम् श्रेयस्करम्"?

(अ) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्) **1 × 2 = 2**

(*i*) तौ कान् प्रेक्ष्य अवदताम्?

(*ii*) बालका: कीदृशे विषमे मार्गे क्रीडन्ति स्म?

(*iii*) यदि कश्चिद् गर्ते पतेत् तर्हि स: किं भूत्वा चिरं क्लेशम् अनुभवेत्?

(ब) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नमेकम्) **2 × 1 = 2**

(*i*) तौ कीदृशे मार्गे क्रीडत: बालकान् अपश्यताम्?

(*ii*) उद्दण्ड: बालक: किम् अवदत्?

(स) प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्) **½ × 4 = 2**

(*i*) "उवाच" इति क्रियापदस्य कर्तृपदं किम्?

(क) तौ (ख) भवन्तौ (ग) बालक:

(*ii*) "कुपथम्" इत्यस्य क: विलोम: गद्यांशे प्रयुक्त:?

(क) श्रेयस्करम् (ख) सुपथम् (ग) क्लेशम्

(*iii*) 'तेषु' सर्वनामपदं केभ्य: प्रयुक्तम्?

(क) चौरेभ्य: (ख) बालकेभ्य: (ग) मार्गेभ्य:

(*iv*) "उद्दण्ड: बालक:" अत्र किं विशेषणपदम् अस्ति्?

(क) उद्दण्ड: (ख) बालक: (ग) विकलाङ्ग:

(*v*) "तौ" इति कर्तृपदस्य क्रियापदं किम्?

(क) उवाच (ख) अवदताम् (ग) क्रीडथ

**12.** अधोलिखितं पद्यं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। **6**

क्रोधाद् भवति सम्मोह: सम्मोहात्स्मृतिविभ्रम:।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति।।

(अ) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्) **1 × 2 = 2**

(*i*) क्रोधात् किं भवति?

(*ii*) मनुष्य: कस्मात् प्रणश्यति?

(*iii*) सम्मोहात् किं भवति?

(ब) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नमेकम्) **2 × 1 = 2**

(*i*) बुद्धिनाश: कस्मात् भवति?

(*ii*) सम्मोह: कदा जायते?

(स) प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्) **½ × 4 = 2**

(*i*) "प्रणश्यति" इतिक्रियापदस्य कर्तृपदं किम्?

(क) क्रोध: (ख) भवति (ग) नर:

(*ii*) "विस्मृति:" इत्यस्य विलोमपदं किं प्रयुक्तम्?

(क) 'स्मृति' इति (ख) विभ्रम: (ग) नाश:

(*iii*) 'मति' शब्दस्य पर्यायपदं किं प्रयुक्तम?

(क) सम्मोह: (ख) 'बुद्धि' इति (ग) स्मृति:

(*iv*) "सम्मोह:" इति कर्तृपदस्य क्रियापदं किम्?

(क) क्रोधाद् (ख) प्रणश्यति (ग) भवति

(*v*) "अविवेक:" इत्यर्थे किं समानार्थकं पदं प्रयुक्तम्?

(क) क्रोध: (ख) सम्मोह: (ग) स्मृतिभ्रंश:

**13.** अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। **6**

भीमसेनः – (युधिष्ठिरं प्रति) भ्रातः। द्रौणिम् अनुगन्तुं मह्यम् अनुमतिं ददातु भवान्।

युधिष्ठिरः – गच्छ वत्स! विजयी भव! नकुलः तव सारथिः भवतु। (भीमसेनः निर्गच्छति, श्रीकृष्णः अर्जुनेन सह प्रविशति।)

श्रीकृष्णः – भो! धर्मराज! समीचीनं न कृतं भवता। पुत्रशोकविह्वलः भीमसेनः एकाकी एव द्रौणिं हन्तुम् अभिधावति।

युधिष्ठिरः – भगवन्। सः तु एकाकी एव द्रोणपुत्राय अलम्।

श्रीकृष्णः – वत्स। न जानाति भवान् द्रौणेः चपलां प्रकृतिम्। पितुः द्रोणात् प्राप्तं ब्रह्मशिरः नाम अस्त्रं विद्यते तस्य पार्श्वे। यदि तत् प्रयुज्यते, सर्वा पृथ्वी दग्धा स्यात्।

(अ) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्) **1 × 2 = 2**

(*i*) पितुः द्रोणात् प्राप्तं किं नाम अस्त्रं द्रौणेः पार्श्वे विद्यते?

(*ii*) 'समीचीनं न कृतं भवता' इति श्रीकृष्णः कं प्रति कथयति?

(*iii*) नकुलः कस्य सारथिः भविष्यति?

(ब) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नमेकम्) **2 × 1 = 2**

(*i*) कम् अनुगन्तुम् भीमसेनाय युधिष्ठिरः अनुमतिं यच्छेत्?

(*ii*) यदि ब्रह्मशिरः अस्त्रं प्रयुज्यते तर्हि किं स्यात्?

(स) यथानिर्देशं प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्) **½ × 4 = 2**

(*i*) "अभिधावति" इति क्रियापदस्य कर्तृपदं किम्?

(क) भीमसेनः (ख) श्रीकृष्णः (ग) अर्जुनः

(*ii*) "प्रकृतिम्" इति पदस्य विशेषणपदं किम्?

(क) द्रौणेः (ख) चपलाम् (ग) भवान्

(*iii*) "सः" इति पदं कस्मै प्रयुक्तम्?

(क) श्रीकृष्णाय (ख) द्रोणपुत्राय (ग) भीमसेनाय

(*iv*) "समीपे" इति समानार्थकं पदं किं प्रयुक्तम्?

(क) सह (ख) पार्श्वे (ग) समीचीनम्

(*v*) "पुत्रशोकविह्वलः" इति कस्य विशेषणपदम् अस्ति?

(क) भीमसेनस्य (ख) अर्जुनस्य (ग) श्रीकृष्णस्य

**14.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत। (केवलं प्रश्नचतुष्टयम्) **1 × 4 = 4**

(क) लोके **धैर्यवान्** परिभवं न प्राप्नोति।

(ख) साधूनां चिते वाचि च **सरलता** भवति।

(ग) राजहंसः **काकस्य** ध्वनिं श्रुत्वा व्याकुलः भवति।

(घ) पिता **पुत्राय** बाल्ये विधाधनं यच्छति।

(ङ) मनुष्यः **साधुवृतिं** समाचरेत्।

**15.** मञ्जूषातः समुचितपदानि चित्वा, अधोलिखित **श्लोकयोः** अन्वयं पूरयत। **2 + 2 = 4**

(क) विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः।
अन्येषां वदने ये तु ते चक्षुनामिनी मते ।।

**अन्वयः–**

अस्मिन् (*i*)_______ विद्वांसः एव चक्षुष्मन्तः (*ii*)_______,

अन्येषां वदने ये (चक्षुषी) (*iii*)_______ तु चक्षुनामिनी (*iv*)_______। **½ × 4 = 2**

(ख) य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च। **½ × 4 = 2**

न कुर्यादहितं कर्म स परेभ्यः कदापि च ।।

**अन्वयः–**

यः (*i*)_______ श्रेयः प्रभूतानि (*ii*)_______ च इच्छति,

सः (*iii*)_______ परेभ्यः (*iv*)_______ कर्म न कुर्यात ।।

**मञ्जूषा**

| |
|---|
| मते, ते, प्रकीर्तिताः, लोके, सुखानि, अहितम्, आत्मनः, कदापि |

**16.** अधोलिखितानां कथनानां समुचितं भावं विकल्पेभ्यः चित्वा लिखत। (केवलं प्रश्नचतुष्टम्) **1 × 4 = 4**

(*i*) **सततं** चक्रवत् परिवर्तमानः।

(क) सदा (ख) निरन्तरम् (ग) भ्रमन्तम्

(*ii*) आपदां **तरणिः** धैर्यम्।

(क) इच्छा (ख) नौका (ग) शक्तिः

(*iii*) **विषादं** त्यक्त्वा उद्यमः क्रियताम्।

(क) दुःखम् (ख) सुखम् (ग) प्रसादम्

(*iv*) काकस्य **गात्रं** यदि काञ्चनस्य।

(क) चञ्चुः (ख) शरीरम् (ग) मुखम्

(*v*) वत्स! न जानाति भवान् द्रौणेः चपलां **प्रकृतिम्।**

(क) वाचम् (ख) स्वभावम् (ग) कीर्तिम्